Different part of
Bhagwat
36

36

॥प्रचेतसः कर्मिष्ठतान् ॥ अन्यान्प्रत्यनं स्तुनीते इत्यादि ध्रुवचरिताद्याः ॥ सत्रे गायन्प्रचेतसामित्युक्तत्वात् ॥२३॥ प्रचेतसां नारदस्य च संवाद
रूपमेतदाख्यानं तेऽभिहितम् ॥ हरेः कीर्त्तनं यस्मिंस्तत् ॥२५॥ य एष वंशः सोऽनुवर्णितः ॥२६॥ यः प्रियव्रतः ॥२७॥ ॥

प्रचेतसः

॥ ॥मैत्रेय उवाच॥ ॥इति प्रचेतसो राजन्नन्याश्च भगवत्कथाः ॥ श्रावयित्वा ब्रह्मलोकं ययौ स्वायंभुवो मुनिः ॥२३॥
तेऽपि तन्मुखनिर्यातं यशो लोकमलापहम् ॥ हरेर्निशम्य तत्पादं ध्यायंतस्तद्गतिं ययुः ॥२४॥ एतत्तेऽभिहितं क्षत्तर्य
न्मां त्वं परिपृष्टवान् ॥ प्रचेतसां नारदस्य संवादं हरिकीर्त्तनम् ॥२५॥ ॥शुक उवाच॥ ॥य एष उत्तानपदो मा
नवस्यानुवर्णितः ॥ वंशः प्रियव्रतस्यापि निबोध नृपसत्तम ॥२६॥ यो नारदादात्मविद्यामधिगम्य पुनर्महीम् ॥ भुक्त्वा
विभज्य पुत्रेभ्य ऐश्वर्यं समगात्पदम् ॥२७॥ इमां तु कौषारविणोपवर्णितां क्षत्ता निशम्याच्युतपादसत्कथाम् ॥ प्रवृद्धभावोऽश्रुकला
कुलो मुनेर्दधार मूर्ध्ना चरणौ हृदा हरेः ॥२८॥ ॥विदुर उवाच॥ ॥सोऽयं तेन महायोगिन्भवता करुणात्मना ॥ दर्शितस्तमसः पारो य
त्राकिंचनगो हरिः ॥२९॥ ॥शुक उवाच॥ ॥इत्यानम्य तमामंत्र्य विदुरो गजसाह्वयम् ॥ स्वानां दिदृक्षुः प्रययौ ज्ञातीनां निर्वृताशयः ॥
॥३०॥ एतद्यः शृणुयाद्राजन्राज्ञां हर्यर्पितात्मनाम् ॥ आयुर्बलं यशः स्वस्ति गतिमैश्वर्यमाप्नुयात् ॥३१॥ ॥ ॥इति श्रीभागवते
महापुराणे चतुर्थस्कंधे पारमहंस्यां संहितायां प्रचेतसो मुपाख्याने नामैकत्रिंशोऽध्यायः ॥ ॥समाप्तोऽयं चतुर्थस्कंधः ॥ ॥

मैत्रेयस्य
चरणौ दधार २८

देहसी हिन २

स्वयंभूमनुपुत्र
स्य

॥ ॥ ॥इति श्रीभागवते महापुराणे पदद्वीपिकायां पारया
॥स्वानां ज्ञातीनां दिदृक्षुः ॥३०॥ राज्ञाम् ॥ चरितमिति शेषः ॥३१॥
नेचतुर्थस्कंधे एकत्रिंशोऽध्यायः ॥ ॥३१॥ ॥समाप्तोऽयं चतुर्थस्कंधः ॥ ॥शृण्वन्स्वयात्सर्वजगतां श्रोत्रहरणं प्रवहद्गुणान्त्र ॥ ॥ ॥

तगवदधानमेव सर्वदेवताराधनमिति कुतः १

॥ कुतः । सर्वमूलत्वादिति सदृष्टांतमाह ॥ यथैव वारः जलानि वर्षाकाले सूर्यादुद्भवंति ग्रीष्मे तस्मिन्नेव प्रविशंति ॥ अस्याः प्रसिद्धत्वेन दृष्टांतांतरमाह ॥ यथा भूतानि भूमाविति ॥ गुणप्रवाहश्चेतनाचेतनात्मकः प्रपंचः ॥ १५ ॥ १६ ॥ नन्वसंगे हरौ कथं प्रपंचोत्पत्तिलयौ । तत्राह ॥ यथेति ॥ अभ्रं तमः प्रकाशाः आगमापायिनो रजस्तमःसत्वस्थानीयाः ॥ हे भूपाः प्रचेतसः ॥ अमूः शक्तयः भवंति विलीयंते इति ॥ एवमयं जग

॥ यथैव सूर्यात्प्रभवंति वारः पुनश्च तस्मिन्प्रविशंति काले ॥ भूतानि भूमौ स्थिरजंगमानि तथा हरावेव गुणप्रवाहः ॥ १५ ॥
एतत्पदं तज्जगदात्मनः परं सकृद्विभातं सवितुर्यथा प्रभा ॥ यथासवो जाग्रति सुप्तशक्तयो द्रव्यक्रियाज्ञानभिदाभ्रमात्ययः ॥
॥ १६ ॥ यथा नभस्यभ्रतमःप्रकाशा भवंति भूपा न भवंत्यनुक्रमात् ॥ एवं परे ब्रह्मणि शक्तयस्त्वमू रजस्तमःसत्वमिति प्रवाहः ॥ १७ ॥
॥ तेनैकमात्मानमशेषदेहिनां कालं प्रधानं पुरुषं परेशम् ॥ स्वतेजसा ध्वस्तगुणप्रवाहमात्मैकभावेन भजध्वमद्धा ॥ १८ ॥
॥ दयया सर्वभूतेषु संतुष्ट्या येन केन वा ॥ सर्वेंद्रियोपशांत्या च तुष्यत्याशु जनार्दनः ॥ १९ ॥ ॥ ॥

त्प्रवाहः ॥ १७ ॥ तेन सर्वकारणत्वेन हेतुना ॥ कालो निमित्तम् ॥ प्रधानमुपादानम् ॥ पुरुषः कर्ता एतत्त्रितयात्मकत्वात्सर्वकारणं परमेश्वरम
ध्वस्तगुणप्रवाहम् । कथं आत्मना । एकभावेन अभिन्नत्वेन ॥ १८ ॥ साधनमाह ॥ दययादिभिः शीघ्रं तुष्यति ॥ १९ ॥ ॥ ॥

श्चैतेषणाः कामाः

॥ ततो न कदाचिद्व्यग्रो भवतीत्याह ॥ अपहता निरस्ताः सकला एव मलाः कामा यस्मात् सर्वात्मा विमलश्चात्मा मनः । तस्मिन् स्तंभं मनसि निरंतर मेधितया भावनयोपहृतः सन्नक्षरो ऽस्ति छिद्रवत्तत्र [आ]काशवत्ततो न सरति नापयातीत्याह ॥ किं कुर्वन् आत्मनो निजजनवशगत्वं स्वभ त्यधीनत्वमयन् अवगच्छन् ॥ २० ॥ सतामेवं वश्योऽसावसतां तु प्रहर्षमपि न गृह्णातीत्याह ॥ नेति ॥ कुमनीषिणां कुत्सितमतीनाम् ॥ अधना आतेऽत्मधनाश्च जनगर्वनास्ते प्रिया यस्य ॥ रसज्ञः भक्तिरसज्ञः ॥ के कुमनीषिणस्तानाह । श्रुतादिनिमित्तैर्मदैर्ये सत्सु पापं [illegible] तिरस्का २४

॥ अपहतसकलैषणामलात्मन्यविरतमीश्वर भावनोपहृतः ॥ निजजनवशगत्वमात्मनोऽयन्नसरति छिद्रवदक्षरः सतां हि ॥ २० ॥ न भजति कुमनीषिणां स इज्यां हरिरधनात्मधनप्रियो रसज्ञः ॥ श्रुतधनकुलकर्मणां मदैर्ये विदधति पापमकिंचनेषु सत्सु ॥ २१ ॥ श्रियमनुचरंतीं तदर्थिनश्च द्विपदपतीन् विबुधांश्च यः स्वपूर्णः ॥ न भजति निजभृत्यवर्गतंत्रः कथममुं विसृजेत्पुमान् रसज्ञः ॥ २२ ॥
हरिमं कृतज्ञः १

भक्तिरसज्ञः १

रं कुर्वंति ॥ २१ ॥ भक्ताधीनत्वं प्रपंचयन्नाह श्रियमनुवर्तमा[..]नामपि श्रियं तदर्थिनः सकामान् द्विपदपतीन् नरेंद्रान् विबुधान् देवानपि यो नानुवर्तते ॥ यतः स्वेनैव पूर्णः अतः स्वभृत्यवर्गानुरक्तो ऽत एवं भूतममुं मीदृदपि कथं परित्यजेत ॥ २२ ॥

॥ निर्जिताः प्राणमनोवचोदृशो येस्तान् ॥ शांताः उपरताः समाना मूलाधारादारभ्य ऊर्ध्वं विग्रहा येषां ते ॥ ब्रह्मणि योजित आत्मा यैः ॥ सुरासुरैरीड्यः स्तुत्यो नारदो ददृशवान् ॥३॥ उत्थाय तं प्रणिपत्य यथादेशं यथाविधि पूजयित्वा ॥४॥ आदिष्टमुपदिष्टं यदात्मतत्त्वं क्षपितं विस्मृतम् ॥६॥
॥ प्रचेतोभिः पृष्टः ॥८॥ अहो गृहप्रसक्त्या हरिसेवां विना जन्मकर्मादिकं व्यर्थं कृतमिति तान् शोचन्नाह । तज्जन्मेति चतुर्भिः ॥ यतो यस्मिञ्जन्मादौ हरिसेवैव फलं मतं तस्तद्विहीनं सर्वं व्यर्थमित्यर्थः ॥ शुक्लसंबंधि जन्म विशुद्धं मातापितृभ्यामुत्पत्तिः सावित्रमुपनयनेन याज्ञिकदीक्षया वि

प्रचेतसः २

॥ तान्निर्जितप्राणमनोवचोदृशो जितासनान् शांतसमानविग्रहान् ॥ परेऽमले ब्रह्मणि योजितात्मनः सुरासुरेड्यो ददृशे स्म नारदः ॥ ॥३॥ तमागतं ते उत्थाय प्रणिपत्याभिनंद्य च ॥ पूजयित्वा यथादेशं सुखासीनमथाब्रुवन् ॥४॥ प्रचेतस ऊचुः ॥ ॥ स्वागतं ते सुरर्षेऽद्य दिष्ट्या नो दर्शनं गतः ॥ तव चंक्रमणं ब्रह्मन्नभयाय यथा रवेः ॥५॥ यदादिष्टं भगवता शिवेनाधोक्षजेन च ॥ तद्गृहेषु प्रसक्तानां प्रायशः क्षपितं प्रभो ॥६॥ तन्नः प्रद्योतयाध्यात्मज्ञानं तत्त्वार्थदर्शनं ॥ येनांजसा तरिष्यामो दुस्तरं भवसागरं ॥७॥ मैत्रेयः ॥ इति प्रचेतसां पृष्टो भगवान्नारदो मुनिः ॥ भगवत्युत्तमश्लोक आविष्टात्माब्रवीन्नृपान् (प्रचेतसः) ॥ नारद उ॰ ॥ तज्जन्म तानि कर्माणि तदायुस्तन्मनो वचः ॥ नृणां येनेह विश्वात्मा सेव्यते हरिरीश्वरः ॥९॥ किं जन्मभिस्त्रिभिर्वेह शौक्रसावित्रयाज्ञिकैः ॥ कर्मभिर्वा त्रयीप्रोक्तैः पुंसोऽपि विबुधायुषा ॥१०॥ श्रुतेन तपसा वा किं वचोभिश्चित्तवृत्तिभिः ॥ बुद्ध्या वा किं निपुणया बलेनेंद्रियराधसा ॥११॥ किं वा योगेन सांख्येन न्याससाध्याययोरपि ॥ किं वा श्रेयोभिरन्यैश्च न यत्रात्मप्रदो हरिः ॥१२॥ ॥ ॥

बुधानामिव दीर्घायुषापि ॥१०॥ वचोभिर्वाग्विलासैः ॥ चित्तवृत्तिभिः नानावधानसामर्थ्यैः ॥ इंद्रियाणां राधसा पाटवेन ॥११॥ योगेन प्राणायामादिना ॥ सांख्येन देहादिव्यतिरिक्तात्मज्ञानमात्रेण ॥ संन्यासवेदाध्ययनाभ्यामपि ॥ श्रेयस्करैरपि व्रतवैराग्यादिभिः श्रेयःसाधनैः ॥१२॥ ॥

२

चे॰ तु॰ नो॰

२५

95

॥ नन्वेषां नानाफलसाधनानां हरिसेवाऽभावमात्रेण कुतो वैयर्थ्यं। तत्राह। श्रेयसां फलानामात्मैवावधिः परा काष्ठा। अर्थतः परमार्थतः॥ आत्मार्थत्वेनैवान्येषां प्रियत्वादित्यर्थः॥ भवत्वात्मावधिः हरेः किमायातं। तत्राह। सर्वेषामपीति॥ आत्मदः अविद्यानिरासेन स्वरूपाभिव्यंजकः॥ ऐश्वर्येणापि रूपेण बलिप्रभृतिभ्यो ऽप्यात्मप्रदः॥ प्रियश्च परमानंदरूपत्वात्॥१३॥ किंच॰ नानाकर्मभिस्तत्तद्देवताप्रीतिनिमित्ताः

॥ श्रेयसामपि सर्वेषामात्मा ह्यवधिरर्थतः॥ सर्वेषामपि भूतानां हरिरात्मात्मदः प्रियः॥१३॥ यथा तरोर्मूलनिषेचनेन तृप्यंति तत्स्कंधभुजोपशाखाः॥ प्राणोपहाराच्च यथेंद्रियाणां तथैव सर्वार्हणमच्युतेज्या॥१४॥ रामरामराम॥

न्यपि फलानि हरिप्रीत्या भवंति॥ केवलं तत्तद्देवताराधने तु न किंचिदिति सदृष्टांतमाह॥ यथेति॥ मूलात्प्रथमविभागाः स्कंधाः। तद्विभागा भुजाः॥ तेषामप्युपशाखाः। उपलक्षणमेतत्। पत्रपुष्पादयोऽपि तृप्यंति॥ न तु मूलमेकं विना स्वस्वनिषेचनेन। प्राणस्यैवोपहारो ऽन्नं भोजनं तस्मादेवेंद्रियाणां तृप्तिः। न तु तत्तदिंद्रियेषु पृथक् पृथग् गात्रलेपनेन। तथाच्युताराधनमेव सर्वदेवताराधनं न पृथगित्यर्थः॥१४

२५

नी॰२ शिवस्य संगेन।

॥सत्संगफलमस्माकं चिरेणानुवृत्तमित्याहुः॥ वयंत्विति॥ तव यः प्रियः सखा तस्य भवस्य॥ अत्यंतमश्चिकित्सस्य भवस्य जन्मनो मृ
त्योश्च भिषक्तमं सद्वैद्यं त्वा त्वां गतिं प्राप्ताः॥३८॥ वरांतरेण वृणते। यन्न इति द्वाभ्याम्॥ नता नमस्कृताः॥३९॥ निरंधसां निरन्नानां अदभ्रं
बहुकालं ते परितोषणाय वृणीमहे॥४०॥ अज्ञानामस्माकं त्वत्स्तुतिमयुक्तेत्याहुः॥ मनुरिति॥ यस्य तव महिम्नो न दृष्टः पारं यैस्तेपि त्वां
आत्मसमं स्वशक्त्यनुरूपं यथा स्तुवंति अथो अतो वयमपि गृणीमः॥४१॥ सत्वमूर्तये वासुदेवाय॥४२॥ यानं तत्र यांतं अनिच्छतामपि संतां स्वधाम ययौ॥

अस्मदीयमेवपश्च — अस्माकं २ — प्रचेतसां ४ — सत्स्वर्थे षष्ठी

हे विभो॥ शिवस्य॥
॥वयंतु साक्षाद्भगवन्भवस्य प्रियस्य सख्युः क्षणसंगमेन॥ सुदुश्चिकित्सस्य भवस्य मृत्योर्भिषक्तमं त्वाद्य गतिं गताः स्मः॥३८॥ यन्नः स्व
जन्ममृत्योः॥ सुवैद्यं त्वां॥ प्राप्ताः॥ अस्माकं॥
धीतं गुरवः प्रसादिता विप्राश्च वृद्धाश्च सदानुवृत्त्या॥ आर्या नताः सुहृदो भ्रातरश्च सर्वाणि भूतान्यनसूययैव॥३९॥ यन्नः सुतप्तं तप
प्रसन्नीकृताः॥ बहुकालं॥
एतदीश निरंधसां कालमदभ्रमप्सु॥ सर्वं तदेतत्पुरुषस्य भूम्नो वृणीमहे ते परितोषणाय॥४०॥ मनुः स्वयंभूर्भगवान्भ
वश्च येन्ये तपोज्ञानविशुद्धसत्वाः॥ अदृष्टपारा अपि यन्महिम्नः स्तुवंत्यथो त्वात्मसमं गृणीमः॥४१॥ नमः समाय शु
द्धाय पुरुषाय पराय च॥ वासुदेवाय सत्वाय तुभ्यं भगवते नमः॥४२॥ ॥मैत्रेय उवाच॥ ॥इति प्रचेतोभिरभिष्टुतो हरिः
प्रीतस्तथेत्याह शरण्यवत्सलः॥ अनिच्छतां यानमतृप्तचक्षुषां ययौ स्वधामानपवर्गवीर्यः॥४३॥ अथ निर्याय सलिलात्प्रचेतस उदं
न्वतः॥ वीक्ष्याकुप्यन्द्रुमैश्छन्नां गां गां रोद्धुमिवोच्छ्रितैः॥४४॥ ततोग्निमारुतौ राजन्नमुंचन्मुखतो रुषा॥ महीं निर्वीरुधं कर्तुं संवर्तक इवात्यये॥४५
भूवं स्वर्गं॥ प्रचेतसः॥ निर्वृक्षां॥ प्रलयाग्निः॥ प्रलये॥

निरशनानां मस्य कमम्र — अपि ४ — भगवन्मनं ६ — अनीशेषव २ — निःस्वस्य ६ — समुद्रस्य २

प्रचेतसः॥
अनपवर्गवीर्यः अकुंठितप्रभावः॥४३॥ उदन्वतः सिंधोः सलिलान्निर्याय निर्गत्य। गां स्वर्गं रोद्धुमिवोच्छ्रितैर्द्रुमैर्गां महीं छन्नां वीक्ष्य द्रुमेभ्योऽकुप्यन्॥ तपसि प्राचीनब
र्हिषः प्रव्रजितत्वादरक्षकत्वाल्लग्नवाद्द्रुमैर्व्याप्ता [illegible] तां कर्तुम्॥ संवर्तकः कालाग्निरुद्रः॥४५॥ ॥
महीं॥

ईश्वरेण ब्रह्मणा २

॥ नयेर्युक्तिभिः॥४६॥ उत्प्रेक्षुः समर्पयामासुः॥४७॥ मारिषां वार्क्षीं॥ अजनयोनिर्ब्रह्मा तस्माज्जातो दक्षः॥ महतो महादेवस्यावज्ञानात् पूर्वमजनयोनिजो
पितृब्रह्मपुत्रोऽपि सन्नुत्तरे यजातो यस्मान्मन्वन्तरे जातः॥४८॥ प्राक्सर्गे पूर्वदेहे कालेन विद्रुते गते सति देवेनेश्वरेण चोदितः सन् इष्टाः प्रजाः ससर्ज। स
दक्षो इति प्रसिद्धः॥ स्वया रुच्या प्रभया तेज उपादत्त आच्छादितवान्। यं च सर्वकर्मदाक्ष्याद्दक्षमब्रुवन्॥५०॥ ते मन्त्रिभिर्विविच्य अनादिर्ब्रह्माप्र
जासर्गे रक्षायां युयोज॥ स च दक्षोऽन्यान् मरीच्यादीन् तत्तत्कार्येषु नियुक्तवान्॥५१॥ ॥इति चतुर्थस्कन्धे त्रिंशोऽध्यायः॥ ॥एकत्रिंशे तु
तैर्दक्षे ध्रुवं न्यस्य वने सन्ताम्॥ नारदोक्तेन मार्गेण मुक्तिरुक्ता प्रचेतसाम्॥१॥ ॥ततो दिव्यवर्षसहस्राणां सहस्रस्यान्ते उत्पन्नविवेकाः

प्रचेतसः

प्रचेतसः १

॥तस्मन्मातृक्रियमाणं स्वानद्रुमान् वीक्ष्य पितामहः॥ आगतः शमयामास पुत्रान् बर्हिष्मतो नयैः॥४६॥ तत्रावशिष्टा ये वृक्षा भीता दुहि
तरं तदा॥ उज्जह्रुस्ते प्रचेतोभ्य उपदिष्टाः स्वयंभुवा॥४७॥ ते च ब्रह्मण आदेशान्मारिषामुपयेमिरे॥ यस्यां महदवज्ञानादजन्यजनयोनिजः॥
॥४८॥ चाक्षुषे त्वन्तरे प्राप्ते प्राक्सर्गकालविद्रुते॥ यः ससर्ज प्रजा इष्टाः स दक्षो दैवचोदितः॥४९॥ यो जायमानः सर्वेषां तेजस्तेजस्विनां रु
चा॥ स्वयोपादत्त दाक्ष्याच्च कर्मणां दक्षमब्रुवन्॥५०॥ तं प्रजासर्गरक्षायामनादिरभिषिच्य च॥ युयोज युयुजेऽन्यांश्च स वै सर्वप्र
जापतीन्॥५१॥ ॥इति श्रीभागवते महापुराणे चतुर्थस्कन्धे त्रिंशोऽध्यायः॥ ॥३०॥ ॥मैत्रेय उवाच॥ ॥तत उत्पन्नविज्ञाना आ
श्वधोक्षजभाषितम्॥ स्मरन्त आत्मजे भार्यां विसृज्य प्राव्रजन् गृहात्॥१॥ दीक्षिता ब्रह्मसत्रेण सर्वभूतात्ममेधसा॥ प्रतीच्यां
दिशि वेलायां सिद्धोऽभूद्यत्र जाजलिः॥२॥

वार्क्षीं

दक्षः

सत्रेण

समुद्रतीरे स्थिताः १ ऋषिः १

प्रचेतसः १

ज्ञानास्तैः। उपयास्यथ मत्सामनिर्विद्यतिरपादं तद्दूत्वधोक्षजभाषितं स्मरन्त आशु प्राव्रजन्॥१॥ ब्रह्मसत्रेण आत्मविमर्शेण दीक्षिताः सन्तः सं
कल्पा बभूवुः॥ सर्वेषां आत्मेति मेधा ज्ञानं यस्मिन् सत्रेण॥ वेलायां समुद्रतीरे॥ जाजलिर्नाम ऋषिः॥२॥ ॥ ॥

प्रचेतसः १ ब्रह्मसत्रेण

अस्माकं३ नमः२ ते२

॥स्वनिष्ठया स्वरूपस्थित्या शुद्धाय अतः शांताय मनसि निमित्ते सति अपार्थ अर्थमेव विलसद्विस्फुरितं द्वयं रूपं यस्मिन् ॥ गृहीता माया गुणैर्विग्रहा ब्रह्मादिमूर्तयो येन ॥२३॥ प्रचेतसः२
स्मृतमात्र एव विशुद्धसत्त्वरूपाय । संसारं हरति मे धाजा नंदस्य तस्मै ॥२४॥२५॥ अयुक्तमेहदूतं तवं तोवयं ॥२६॥ यदुक्तं वरं वृणीष्वेति तत्र निदिध्यायादुःखम् रूपा विष्कर
तेउ॥ मिसमस्तानां क्लेशानां संहारयो यस्मात् तेन आविःकृतं प्रकटितं अतोत्र त्वि मनुकंपित मनुकंपाईयमेवास्माकं परमनुकंपेत्यर्थः ॥२७॥
कुतस्त्यतस्त्राह हे अभद्ररंधन अमंगलनाशनत्वं प्रत्ययोऽत्र विवक्षितः एतावदेव दीनेषु वत्सलैः पुंभिर्माग्यं कांक्ष्यं किंत तदाह यदिति अ

लमार

॥शुद्धाय शांताय नमः स्वनिष्ठया मनस्यपार्थं विलसद्द्वयाय ॥ नमो जगत्स्थानलयोदयेषु गृहीतमायागुणविग्रहाय ॥२३॥ नमो विशुद्धसत्त्वाय हरये हरिमे
धसे वासुदेवाय कृष्णाय प्रभवे सर्वसात्वताम् ॥२४॥ नमः कमलनाभाय नमः कमलमालिने नमः कमलपादाय नमस्ते कमलेक्ष लमार
णः ॥ नमः कमलकिंजल्कपिशंगामलवाससे सर्वभूतनिवासाय नमो युत्ताहिसाक्षिणे ॥२६॥ रूपं भगवता त्वेतदशेषक्लेशसंक्षयम् । आविःकृ
तं नः क्लिष्टानां किमन्यदनुकंपितं ॥२७॥ एतावत्त्वं हि विभुभिर्भाव्यं दीनेषु वत्सलैः ॥ यदनुस्मर्यते काले स्वबुद्ध्याभद्ररंधन ॥२८॥
हे अमंगलनाशन१
येनोपशांतिर्भूतानां क्षुल्लकानामपीहतां ॥ अंतर्हितोऽन्तर्हृदये कस्मान्नो वेद नाशिषः ॥२९॥
अस्माकं१

त्वया१ यत॥१

स्मदीया एते इति बुध्या अचिंते काले अनुस्मर्यते इति यस्मात्त्वयानुरूपं दर्शितं मिति भावः ॥२८॥ येनानुस्मरणेन स्मृतानां तेषामुपशांतिः सुखं
अपितु१ भवति किं च क्षुल्लकानामपि भूतानामंतर्हृदये अंतर्हितः अंतर्यामित्वेन स्थितो भवानीहतामिच्छतां त्वदुपासकानां नोऽस्माकं आशिषः कस्माद्वे वराः१
त्तो न वेद जानात्येवेत्यर्थः ॥२९॥

॥ यद्यपि त्वं मदादिभिः ज्ञातुं न शक्यसे तथापि यद्यस्माकं वरादिकं वक्तव्यं तर्हि भगवत्प्रसाद एवास्माकमीप्सितो वर इति वक्ष्यमाणं पदद्वयेनार्थः ॥ १ ॥

श्री·च·तु·
८३
१)

॥ तथापि वक्तव्यं चेत्तर्हि येषामस्माकं भगवान्प्रसन्नः। असावेव वरः भगवत्प्रसाद एवास्माकमीप्सितो वर इत्यर्थः ॥ अपवर्गगुरुर्मोक्षमार्गप्रदर्शिकः। गतिः सर्वपुरुषार्थभूतः ॥ ३० ॥ यद्यप्येवं तथापि हे नाथ त्वत्तः वरमेकं वृणीमहे ॥ कथंभूतात् परतः कारणादपि परात्परतः परादिति श्रुतेः ॥ अतो यद्यपि त्वं दातुं समर्थः। न च देयानां त्वद्विभूतीनामन्तो यतोऽनन्तविभूतित्वादनन्त इति गीयसे ॥ ३१ ॥ तथापि यथा सारङ्गो भ्रमरः पारिजाते स्वयमेव लब्धे सति स्वर्लताकमन्यत्पद्मादिकं न सेवते तथा वयमपि साक्षात्त्वदङ्घ्रिमूलं प्राप्य किं वृणीमहि। न किंचिदित्यर्थः। किमन्यत् तुच्छं किमर्थं वृणीमहि ॥ यद्वा यदि वृणीमहि तर्हि किं किं वृणीमहि। अनन्तत्वेन मनोरथानामनवस्थानादित्यर्थः ॥ ३२ ॥ अत एतावदेव प्रार्थयामहे

॥ असावेव वरोऽस्माकमीप्सितो जगतः पते। प्रसन्नो भगवान्येषामपवर्गगुरुर्गतिः ॥ ३० ॥ वरं वृणीमहेऽथापि नाथ त्वत्परतः परात्। न ह्यन्तस्त्वद्विभूतीनां सोऽनन्त इति गीयसे ॥ ३१ ॥ पारिजातेऽञ्जसा लब्धे सारङ्गोऽन्यन्न सेवते। त्वदङ्घ्रिमूलमासाद्य साक्षात्किं किं वृणीमहि ॥ ३२ ॥ यावत्ते मायया स्पृष्टा भ्रमाम इह कर्मभिः। तावद्भवत्प्रसङ्गानां सङ्गः स्यान्नो भवे भवे ॥ ३३ ॥ तुलयाम लवेनापि न स्वर्गं नापुनर्भवम्। भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः ॥ ३४ ॥ यत्रेड्यन्ते कथा मृष्टास्तृष्णायाः प्रशमो यतः। निर्वैरं यत्र भूतेषु नोद्वेगो यत्र कश्चन ॥ ३५ ॥ यत्र नारायणः साक्षाद्भगवान्न्यासिनां गतिः। संस्तूयते सत्कथासु मुक्तसङ्गैः पुनः पुनः ॥ ३६ ॥ तेषां विचरतां पद्भ्यां तीर्थानां पावनेच्छया। भीतस्य किं न रोचेत तावकानां समागमः ॥ ३७ ॥

सत्संगे ४ मोक्षे ३ सत्संगे

इत्याहुः। यावदिति ॥ स्पृष्टा व्याप्ताः सन्तः। भगवति प्रसङ्गः संगो येषां तेषां संगोऽस्माकं स्यात् ॥ ३३ ॥ ननु राज्यभोगादिस्वर्गादिभोगांश्च विहाय किमिदं प्रार्थ्यते तत्राहुः। तुलयाम इति ॥ भगवत्संगिनां संगस्य लवेनापि ॥ ३४ ॥ सत्संगस्य श्रैष्ठ्यं प्रपञ्चयति ॥ यत्रेति त्रिभिः ॥ यत्र येषु। यतः यासु कथासु। निर्वैरं वैराभावः ॥ ३५ ॥ पद्भ्यां पावनेच्छया संसारात् भीतस्य ॥ ३७

८३

॥ यूयं मे मत्तो वरं वृणीध्वं । सौहार्देन हेतुना अपृथग्धर्मा येषां संबोधनम् । वः परस्परं सौहार्देन तुष्टोऽहं ॥ ८ ॥ भूते बु सौहार्दं च भविष्यति ॥ ९ ॥ तेभ्यो दास्ये किं पुनर्युष्मभ्यमिति शेषः ॥ १० ॥ अग्रहीष्ट गृहीतवंतः ॥ अथो इति हेतोः लोकाननु लोके पुनर्भविष्यति । यथा लोकाननु भविष्यति द्रक्ष्यति प्राप्स्यति स्पर्धः ॥ ११ ॥ आत्मनो वीर्येण संतानेन ॥ १२ ॥ पुत्रार्थमादेनार्थं संपादयति ॥ कंडोरिति त्रिभिः ॥ तपोनाशार्थमिंद्रप्रेषितया प्रम्लोचया कंडुर्नाम ऋषिर्बहुकालं रेमे । सा च ततः स्वर्गं गच्छंती कंडोर्जातं गर्भं वृक्षेषुत्सृज्य जगाम । तदेवमुक्तं । अपविद्धां त्यक्ताम् ॥ १३ ॥ स प्रसिद्धो वनस्पतीनां राजा सोमः अमृतमयीं देशिनीं रुदंत्यास्तस्या मुखे निदधे । अनेनापारसो गर्भसंभवेनामृतोद्गारेण च तस्या लावण्यं ... दौर्गंध्यादिराहित्यं चोक्तम् ॥ १४ ॥

युष्मा दे युषां त्यक्तां ४ वितर्कैः

॥ श्रीभगवानुवाच ॥ ॥ वरं वृणीध्वं भद्रं वो यूयं मे नृपनंदनाः ॥ सौहार्देनापृथग्धर्मास्तुष्टोऽहं सौहृदेन वः ॥ ८ ॥ योऽनुस्मरति संध्यायां युष्माननुदिनं नरः ॥ तस्य भ्रातृष्वात्मसाम्यं तथा भूतेषु सौहृदम् ॥ ९ ॥ ये तु मां रुद्रगीतेन सायं प्रातः समाहिताः ॥ स्तुवंत्यहं कामवरान् दास्ये प्रज्ञां च शोभनाम् ॥ १० ॥ यद्यूयं पितुरादेशमग्रहीष्ट मुदान्विताः ॥ अथो व उशती कीर्तिर्लोकाननु भविष्यति ॥ ११ ॥ भविता विश्रुतः पुत्रोऽनवमो ब्रह्मणो गुणैः ॥ य एतामात्मवीर्येण त्रिलोकीं पूरयिष्यति ॥ १२ ॥ कंडोः प्रम्लोचया लब्धा कन्या कमललोचना ॥ तां चापविद्धां जगृहुर्भूरुहा नृपनंदनाः ॥ १३ ॥ क्षुत्क्षामाया मुखे राजा सोमः पीयूषवर्षिणीम् ॥ देशिनीं रोदमानाया निदधे स दयान्वितः ॥ १४ ॥ प्रजाविसर्ग आदिष्टाः पित्रा मामनुवर्तता ॥ तत्र कन्यां वरारोहां तामुद्वहत मा चिरम् ॥ १५ ॥ अपृथग्धर्मशीलानां सर्वेषां वः सुमध्यमा ॥ अपृथग्धर्मशीलेयं भूयात्पत्न्यर्पिताशया ॥ १६ ॥

तर्जनीं २ वार्क्षीनाम्नी ३ यूयं २

चंद्रः ५

युषां

॥ मामनुवर्तमानेन पित्रा नियुक्ताः संतः तत्र प्रजासर्गनिमित्तं तामुद्वहत ॥ १५ ॥ ननु बहूनां कथमेका जायेत्याह ॥ अपृथग्धर्माः शीलं च येषां तेषां वः पत्नी भूयात् ॥ अर्पितो अन्वस्मिन् आशयो यया ॥ धर्मशीलयोरैक्यान्मदाज्ञया चानेन दोषोऽविरोध इति भावः ॥ १६ ॥

मनः

श्री० च० स्कं०

९२

गृहेषु२ योगाद्वैराग्यं मनः१ गृहेर्षि१ गात्रैरपश्याय वैराग्यं प्राप्य१ वार्तयार

॥अहतौजसः अप्रतिहतबलाः संतः॥१७॥ पक्वगुणोदयकामादिमलआशयो येषाम्। अतो लोकद्वयवर्जो विघमस्थाने प्राप्स्यथ॥ ननु गृहेषु
प्रविष्टानामस्माकं तदा मे ज्ञात्वा बंध एव स्यात्। कुतस्तद्भक्तिर्निर्वेदो वा तत्राह। गृहेष्विति॥ मदर्पितं कुशलं कर्म येषां। मद्वार्त्तायां यातो यामः का
लो येषाम्॥१९॥ तत्र हेतुः श्रोतृत्वं [illegible] इति कुतस्तत्राह॥ नव्यवदिति॥ यद् यस्मात् कथाश्रवणाद् ज्ञः सर्वज्ञो हमीश्वरः ब्रह्मवादिभिः
प्रवक्तृभिर्निर्दिष्टम् अतः श्रोतृत्वं तद्धृदये नव्यवत् प्रतिपदं नूतनवत् अये प्राप्तो ब्रह्मसाक्षात्कारो भवतीत्यर्थः॥ ननु त्वत्कथाश्रवणे कथं
ब्रह्मसाक्षात्कारस्तत्राह। योहमेव देवब्रह्म। तत्र हेतुः। यतो गतां यं मां प्राप्ताः संतो मोहशोकहर्षान्न प्राप्नुवंति। अतो मत्कथाश्रवणेनैव

श्रोतारः१

कथाश्रोतृत्वं४

पुष्पं२ सर्गकामा कथा२ अकामि वादिला१

॥दिव्यवर्षसहस्राणां सहस्रमहतौजसः॥ भौमान्भोक्ष्यथ भोगान्वै दिव्यांश्चानुग्रहान्मम॥१७॥ अथ मय्यनपायिन्या भक्त्या पक्वगु
णाशयाः॥ उपयास्यथ मद्धाम निर्विद्य निरयादतः॥१८॥ गृहेष्वाविशतां चापि पुंसां कुशलकर्मणां॥ मद्वार्तायातयामानां न बंधाय गृहा
मताः॥१९॥ नव्यवद्धृदये यज्ज्ञो ब्रह्मैतद्ब्रह्मवादिभिः॥ न मुह्यंति न शोचंति न हृष्यंति यतो गताः॥२०॥ ॥मैत्रेय उवाच॥ ॥एवं ब्रुवाणं
पुरुषार्थभाजनं जनार्दनं प्रांजलयः प्रचेतसः॥ तद्दर्शनध्वस्ततमोरजोमला गिरागृणन् गद्गदया सुहृत्तमम्॥२१॥ ॥
प्रचेतस ऊचुः॥ ॥नमो नमः क्लेशविनाशनाय निरूपितोदारगुणाह्वयाय॥ मनोवचोवेगपुरोजवाय सर्वाक्षमार्गैरगताध्वने नमः॥२२॥

कथाश्रोतृत्वं१ ममविज्ञानस्येव

नमः यो विज्ञानादस्येव ब्रह्मसाक्षात्कारस्तान् गृहेषु वसतामपि न बंध इत्यर्थः॥२०॥ पुरुषार्थं भजयति प्रापयतीति तथा तम्॥२१॥ वेदैः सकल
श्रेयःसाधनत्वेन निरूपिता उदारा गुणाह्वयाः नामानि यस्य॥ मनोवचसोर्वेगादपि पुरो अग्रतो जवो वेगो यस्य। मनोवचसोरगोच
रायेत्यर्थः॥ अतएव सर्वेषामक्षाणां मार्गैरगतोऽनवगतोऽध्वा मार्गस्तस्मै नमः॥२२॥ ॥

इंद्रियाणां१

९२

देहसंबंधं त्यजन्नः २ स्वकीर्य मनः संसारहेतुः ३ पुत्र रूपादिविषयान् ३ लिंगापमरणाति द्विषकर्मकर ४

॥ नन्वेकं देहं विसृज्य देहांतरप्रवेशात् सर्वं विदेहतास्यादेवेत्यतआह । यथेति ॥ नापयाति स्वस्थानात् त्यागात् अपयाति च स्वस्थानं तरधारणात् तथा नैव त्यजेत् ॥ ७६ ॥ अन्यं देहं कर्मणां प्राग्देहारंभकाणां व्यवधानेन विच्छेदेन समाप्त्या प्रकरणार्थमुपसंहरति ॥ मन एवेति ॥ भवभावनं संसारहेतुः ॥ कथं सति तदाह । यदेति ॥ चरितान् उपभुक्तान् ॥ यतः कर्मणि सति । नन्वसंगस्य कुतः कर्म तत्राह । अविद्यायां सत्यां अनात्म

॥ भवभावनमिति ॥ एवं देहकृतानामेतद्देहारंभकाणां कर्मणां समाप्तौ सत्यामेतद्देहपाते पि दशगात्रादिकर्मकं देहांतरं प्राप्नोति लिंगदेहनाशेन तत्र मनसः सत्वान्मन एव तत्र जन्ममरणप्रवाहं संसारहेतुः २ हहेतुरिति न विदेहमुक्तिरिति भावः ॥ ऊर्ध्वदैहिकक्रियाक ॥ एतद्देहत्यागानंतरं जीवो मलनेतो प्राग्देहारंभकाणां

॥ यथा तृणजलौकैवं नापयात्यपयाति च ॥ न त्यजेन्म्रियमाणोपि प्राग्देहाभिमतिं जनः ॥ ७६ ॥ यावदन्यं न विंदेत व्यवधानेन कर्मणां ॥ मन एव मनुष्येंद्र भूतानां भवभावनम् ॥ ७७ ॥ यदाक्षैश्चरितान् ध्यायन् कर्माण्याचिनुतेसकृत् ॥ सति कर्मण्यविद्यायां बंधः कर्मण्यनात्मनः ॥ ७८ ॥ अतस्तदपवादार्थं भज सर्वात्मना हरिम् ॥ पश्यंस्तदात्मकं विश्वं स्थित्युत्पत्त्यप्यया यतः ॥ ७९ ॥ ॥ मैत्रेय उवाच ॥ ॥ भागवतमुख्यो भगवान्नारदो हंसयोर्गतिम् ॥ प्रदर्श्य ह्यमुमामंत्र्य सिद्धलोकं ततोगमत् ॥ ८० ॥ प्राचीनबर्ही राजर्षिः प्रजासर्गाभिरक्षणे ॥ आदिश्य पुत्रानगमत्तपसे कपिलाश्रमम् ॥ ८१ ॥ तत्रैकाग्रमना वीरो गोविंदचरणांबुजम् ॥ विमुक्तसंगोनुभजन् भक्त्या तत्साम्यतामगात् ॥ ८२ ॥ एतदध्यात्मपारोक्ष्यं गीतं देवर्षिणानघ ॥ यः श्रावयेद्यः शृणुयात्स लिंगेन विमुच्यते ॥ ८३ ॥ एतन्मुकुंदयशसा भुवनं पुनानं देवर्षिवर्यमुखनिःसृतमात्मशौचम् ॥ यः कीर्त्यमानमधिगच्छति पारमेष्ठ्यं नास्मिन् भवे भ्रमति मुक्तसमस्तबंधः ॥ ८४ ॥ अध्यात्मपारोक्ष्यमिदं मयाधिगतमद्भुतम् ॥ एवं स्त्रियाश्रमः पुंसश्छिन्नोमुत्र च संशयः ॥ ८५ ॥ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे एकोनत्रिंशोध्यायः ॥ ॥ २९ ॥ ॥ ॥ ॥

मनःशोधकं २ नारदेन ३ सर्वोत्कृष्टफलदं २ मैत्रेयेण २

॥ नो देहादेः कर्मणि बंधो भवति ॥ ७८ ॥ विश्वस्य स्थित्यादयो यतो हरेर्भवंति ॥ ७९ ॥ हंसयोर्जीवेश्वरयोः ॥ ८० ॥ पुत्रानादिश्येति ॥ पुत्राणामादेशं मंत्रिणामग्रे कथयित्वा ॥ ८१ ॥ आत्मशौचं मनःशोधकम् ॥ पारमेष्ठ्यं सर्वोत्कृष्टफलदम् ॥ ८४ ॥ स्त्री बुद्धिः स्वात्मा हि तस्याः आश्रमो हंकारः छिन्नो भवति ॥ अमुत्र कर्मफलभोगः कथमिति संशयश्छि न्नः ॥ ८५ ॥ ॥ इति श्रीभागवते टीकायामेकोनत्रिंशोध्यायः ॥ ॥ ॥ ॥

द्वैधकर्मविषये वा । स्थूलदेहमेतदेहस्य तत्कर्मणां च बलात् विदेहप्राप्तिः नाभवत् जीवस्यापि देहप्रप्ति २ जीवांतरं

प्राचीनबर्हिषं ४

तत्साम्यतां ३

बंधः ७

भ्रां १

संसारनाशार्थं ३ जीवेश्वरयोः ३

लिंगदेहेन ५

प्रचेतसः१

॥प्रसंगात्संचकितैः प्रोक्तं तु तं प्राचीनबर्हिषः॥ वक्ष्यते च पुनर्दीर्घं प्रस्तुतं च प्रचेतसाम्॥१॥ तत्र विंशेत पस्तुच्छा दीशाल्लक्ष्य वरास्ततः॥ आगत्य वा
चीमुखा स्वरा त्रं च कुर्वितीर्यते॥२॥ ॥हरिं प्रतोष्यकामास्ते द्विमापुः॥१॥ हे वा हरस्य त्वकस्यां चेदिवाधायां सह स्यते मैत्रेयः॥ दीर्घ्य मुतिज्ञातव्यमाते य
दृष्ट्या गिरीशं प्राप्य तस्यैव केवलस्य नाथप्रियस्य गिरिशस्य पार्श्ववर्तिनः॥ तद्गुरुगृहीतां संतो नूनं परं मोदं प्रापुरेवा॥ ततः पूर्वं तिह्यथवापरत्र किं
प्रापुः॥२॥ रुद्रगीतं जपद्भिः प्रचेतोभिर्न तपसा च पुरंजनं हरिं तिवांस्तु तपःक्लेशं रुचा कांत्या शमयन् शांतेन स तेन वपुषाविर्भूतः॥३॥४॥ सुपर्णस्कंधमारूढः त्या

प्रचेतसः॥१॥२॥ मोक्षं२ प्रचेतसां२ हे मैत्रेय१

॥विदुर उवाच॥ ॥ये त्वयाभिहिता ब्रह्मन् सुताः प्राचीनबर्हिषः॥ ते रुद्रगीतेन हरिं सिद्धिमापुः प्रतोष्य काम्॥१॥ किं बार्हस्पत्येह परत्र वा
कैवल्यनाथप्रियपार्श्ववर्तिनः॥ आसाद्य देवं गिरिशं यदृच्छया प्रापुः परं नूनमथ प्रचेतसः॥२॥ ॥मैत्रेय उवाच॥ ॥प्रचेतसोन्तरुदधौ
पितुरादेशकारिणः॥ जपयज्ञेन तपसा पुरंजनमतोषयन्॥३॥ दशवर्षसहस्रान्ते पुरुषस्तु सनातनः॥ तेषामाविरभूत्कृच्छ्रं शान्तेन शमयन्
रुचा॥४॥ सुपर्णस्कंधमारूढो मेरुशृंगमिवांबुदः॥ पीतवासा मणिग्रीवः कुर्वन्वितिमिरा दिशः॥५॥ काशिष्णुना कनकवर्णविभूषणेन भ्राजत्क
पोलवदनो विलसत्किरीटः॥ अष्टायुधैरनुचरैर्मुनिभिः सुरेन्द्रैरासेवितो गरुडकिन्नरगीतकीर्तिः॥६॥ पीनायताष्टभुजमंडलमध्यलक्ष्म्या स्प
र्धच्छ्रिया परिवृतो वनमालयाद्यः॥ बर्हिष्मतः पुरुष आह सुतान्प्रपन्नान्पर्जन्यनादरुतया सघृणावलोकः॥७॥ ॥ ॥ ॥

प्रचेतसः१ वाचा१

दिनाबर्हिष्मतः सुतान्नाहेति तृतीयेनान्वयः॥५॥ कनकमयेन स्वर्णवता विभूषणेन भ्राजमानं कपोलं वदनं यस्य॥ अष्टाभिरायुधैः॥ गरुडएव किन्न
रस्तेन पक्षस्वनैर्गीता कीर्तिर्यस्य॥६॥ पीनान्यतेश्चायतानि अष्टौ भुजास्तेषां मंडले समूहस्तन्मध्ये स्थितया लक्ष्म्या स्पर्द्धमाना श्रीः शोभा यस्यास्तया व
नमालया परिवृतः पुरुष आद्यः आह॥७॥ पर्जन्यस्य नादइव रुतं नादो यस्यास्तया वाचा॥ सघृणोऽवलोको यस्य॥७॥ ॥ ॥ ॥ ॥

॥ किंच । मनो ह्येव पूर्वापरादिशून्याशून्यमनन्तमेवात्मेशरीरादिरूपेणाध्यायते । इत्याह । मन एवेति ॥ मदृष्टं ते इति सम्यगवधानार्थमामंत्रणम् । स्तिनं ददाति । न विद्यत उत्पन्नं वा प्राप्यतः ॥ न न विद्यतः नीचत्वं प्राप्यतो पिन्नाबीने रूपाणि शं (मनः) संतिं मन एव चैतोदार्यकार्यणादिवृत्तिः । पूर्वमप्येवमेवासीत् पश्चादप्येवमेव न विद्यतीति ज्ञापयतीत्यर्थः ॥ ६६ ॥ ननु कदाचिद्दर्शनानर्हमपि स्वप्ने स्वप्ने प्रतीयते । यथा पर्वताग्रे समुद्रः दिवा नक्षत्राणि स्वप्ने स्वच्छेद इत्यादि । तत्राह । अदृष्टमिति ॥ अन्यदेशाश्रयसमुद्रादिकं पर्वताग्रे । निशाश्रयं नक्षत्रादिकं दिवा । अन्यंगादिक्रियाश्रयं स्वप्ने स्वच्छेदनाश्रयं निद्रादिदोषेण हि प्रतीयते इत्यनुगंतव्यम् ॥ परस्यापि तदनुपपत्तेः स्तुत्यत्वादिति भावः ॥ ६७ ॥ ननु यदि दृष्टं क्वचिन्न स्वात्मानं महाराजं पश्यति । राजा च रंकमात्मानं पश्यति । तत्कथमसंभावितं संगच्छते । तत्राह । सर्व इति ॥ आयांति ज्ञेयत्वेन प्रादुर्भवंति । यांति च योगात्

॥ मन एव मनुष्याणां पूर्वरूपाणि पश्यति ॥ न विद्यते (श्रो) मदृष्टं ते तथैव न न विद्यतः ॥ ६६ ॥ अदृष्टमश्रुतं चापि क्वचिन्मनसि दृश्यते ॥ यथा तथानुमंतव्यं देशकालक्रियाश्रयम् ॥ ६७ ॥ सर्वे क्रमानुरोधेन मनसींद्रियगोचराः ॥ आयांति बहुशो यांति सर्वे समनसोऽमनाः ॥ ६८ ॥ सत्वैकनिष्ठे मनसि भगवत्पार्श्ववर्तिनि ॥ तमश्चन्द्रमसीवेदमुपरज्यावभासते ॥ ६९ ॥

ध्यानपरे १ संयोगमिवप्राप्य १

मनो रहितः

तरं ॥ यदि कश्चिद्धि मनाग्भवेत् सर्वैवं न स्यात् न त्वेदस्तीत्याह । सर्वे समनस इति ॥ अतः सर्वेषां समनस्कत्वान्मनसि च सर्वार्थानां क्रमेण प्रवेशात्तत्त्वं तो दृष्टचरः कस्यापि कश्चिदर्थो नास्तीत्यर्थः ॥ ६८ ॥ तदेवं सर्वैरपि सर्वेऽप्यर्थाः क्रमेण दृश्यंत इत्युक्तम् ॥ इदानीं युगपदपि सर्वदर्शनं कदाचिद्भवतीत्याह ॥ सत्वैकनिष्ठ इति ॥ भगवत्पार्श्ववर्तिनि भगवद्ध्यानपरे मनसीदं विश्वमुपरज्य संयोगमिव प्राप्यावभासते प्रतीयते न हि सर्वस्यापि कदाचित् प्रतीतिर्दृष्टांतः । चंद्रमसमुपरज्यतमः राहुः तद्वदिदं शुद्धे मनसि सर्वविषयस्फुरणं योगिप्रसक्तमिति प्रसिद्धं ॥

स्फ १

दिव ॥ १ ॥

श्री॰वे॰तं॰

२०

॥ तदेवं स्थूलदेहनाशेपि लिंगदेहस्यानाशाद्न्यः कर्ताभोक्तेति नास्तीत्युक्तम्। तत्रैव शंकते। ननु लिंगदेहस्य स्थूलदेहद्वारैव कर्तृत्वभोक्तृत्वे। ननु केवलस्य॥ तत्र कदाचित् स्थूलदेहाभावे जीवस्य कर्तृत्वभोक्तृत्वाभावान्मुक्तिः प्रसज्येत। तत्राह। अहं ममेति भावः स्थूलदेहसंबंधः पुरुषे जीवे न व्यवधीयते नविछिन्नो भवति। किं पर्यंतं। बुद्ध्यादीनां सूक्ष्मः लिंगं यावदस्ति॥ अनादिमानसूनादिः सन्॥ ७०॥ स्वापदेवाहंकाराभावात् तद्विछेदमाशंक्याह। विस्त्यां॥ सुप्त्याः स्फुरति। नान्यथेत्यर्थः॥ ७१॥ अपोक्कल्यादसंपूर्णत्वात्। प्राणायतनानामिंद्रियाणां विधानादिंद्रियैरिदंकारास्पदवस्तुग्रहणे स्वयंकारेः स्फुरति। नान्यथेत्यर्थः॥ ७१॥ प्राणायतनानामितिशेषः॥ पुनस्तरुणस्य यदेकादशविधमेकादशेंद्रियैः स्फुटं लिंगमहंक

॥ नाहं ममेति भावो यं पुरुषे व्यवधीयते॥ यावद्बुद्धिमनोक्षार्थगुणव्यूहोप्यनादिमान्॥ ७०॥ सुप्तिस्वप्नोपतापेषु प्राणायामविधानतः॥ नेहते हमिति ज्ञानमस्तु प्रत्यक्षयोरपि॥ ७१॥ गर्भे बाल्येप्यपौष्कल्यादेकादशविधं तदा॥ लिंगं न दृश्यते यूनः कुह्वां चंद्रमसो यथा॥ ७२॥ अर्थे ह्यविद्यमानेपि संसृतिर्न निवर्तते॥ ध्यायतो विषयानस्य स्वप्नेनर्थागमो यथा॥ ७३॥ एवं पंचविधं लिंगं त्रिवृत्षोडशविस्तृतं॥ एष चेतनया युक्तो जीव इत्यभिधीयते॥ ७४॥ अनेन पुरुषो देहानुपादत्ते विमुंचति॥ हर्षशोकं भयं दुःखं सुखं चानेन विंदति॥ ७५॥

(स्थूलदेहसंबंधः १ — अहंकारः २ — भवति २ — इंद्रिया — इंद्रियाणामसंपूर्णत्वात् २ — सूक्ष्मविशेषबलं १ — अहंकारः २ — दुःखे ५ — इंद्रिय २ — लिंगदेहः — लिंगदेहेन — जीवस्य २ — लिंगेन। जीवो लभते।)

रणं तत्र दृश्यते। प्रत्यगादेरितिशेषः॥ सतो प्यनभिव्यक्तौ दृष्टांतः। कुह्वाममावस्यायां चंद्रमसो लिंगं रूपमिव॥ ७२॥ तस्मादहंकारास्पदस्य स्थूलदेहस्याविद्यमानत्वेपि संसृतिनिवृत्तिर्नास्तीत्याह। अर्थ इति॥ ७३॥ यावल्लिंगं स्थूलदेहं विद्यमानं तावत् संसृतिनिवृत्तिर्नास्तीत्येतत्प्रपंचयति॥ एवमिति सार्द्धैः श्लोकैः॥ पंचविधं पंचतन्मात्रात्मकम्॥ त्रिवृत् त्रिगुणं। षोडशविकारास्तैर्विस्तृतम्॥ ७४॥ ७५॥

(अप्रकटने २ — यथा न दृश्यते — अनाशपर्यंतम् — सूक्ष्मादि — षष्ठि आदि)

नप्रकाशते २

स्थूलदेहे ३

अनाशात् २

॥ नष्टेंदुकलामाकुहूः २

२०

॥आचार्योपदिष्टकर्मप्रतिपादकवाक्यविरोधेन॥कर्मकाण्डज्ञानविरोधः४

जीवानां २ विचक्ष्व १ धु। आत्मानं ज्ञानेनेवेति ४ कर्मफले ४ आत्मा १ कर्मफले ४

॥उपदेशसारमाह। स इति॥ विचक्ष्व विचारय। अन्तर्हृदि चित्तं कर्णयोर्धुनीं नदीमिव वर्तमानां चित्ते नियच्छ। एतच्च सर्वेन्द्रियोपलक्षणार्थं। गृहाश्रमं च जहि॥ कीदृशं। असत्तमानां मैथुनसुखानां यानि यूथानि तेषां गाथा वार्ता यस्मिन्। जीवानां शरणं मीश्वरं मैवं क्रमेण सर्वतो विरम॥५५॥ अर्थान्तरं प्रष्टुं पूर्वोक्तं मर्थमनुवदति। श्रुतमन्वीक्षितं विचारितं। ब्रह्मन् नारद। एतत्तु उक्तमात्मतत्वं उपाध्याया ये कर्मोपदेष्टारः आचार्यास्ते न जानन्ति॥५६॥ अत एव तत्उपाध्यायकृतः तद्वाक्यविरोधजनितो महान्संशयः सञ्छिन्नः। यत्र तु संशयो वर्तते। यत्रेन्द्रियवृत्तीनामप्र वृत्तेर्मुह्यन्ति॥५७॥ संशयमाह। द्वाभ्यां। कर्माणि येन देहेन तमत्रैव विहायामुत्रलोकान्तरे कर्मोपस्थापितेनान्येन देहेन जुष्टानि उपभुक्तानि जीवोऽश्नुते प्राप्नोति॥५८॥ इति वादः श्रूयते। प्राप्य पुण्यकृतांल्लोकानिति श्रुतेः। कर्मदोषैर्याति स्थावरतां नर इति। तथा चोक्तं वेदे। शास्त्रं तीर्थं...

वि २ चि देहेन स्वलोके २ ईश्वरशरणं १

॥स त्वं विचक्ष्व मृगचेष्टितमात्मनोऽन्तश्चित्तं नियच्छ हृदि कर्णधुनीं च चित्ते। जह्यङ्गनाश्रममसत्तमयूथगाथं प्रीणीहि हंसशरणं विरम क्रमेण॥५५॥ ॥राजोवाच॥ ॥श्रुतमन्वीक्षितं ब्रह्मन्भगवान्यदभाषत। नैतज्जानन्त्युपाध्यायाः किं न ब्रूयुर्विदुर्यदि॥५६॥ संशयोऽत्र तु मे विप्र सञ्छिन्नस्तत्कृतो महान्। ऋषयोऽपि हि मुह्यन्ति यत्र नेन्द्रियवृत्तयः॥५७॥ कर्माण्यारभते येन पुमानिह विहाय तम्। अमुत्रान्येन देहेन जुष्टानि स यदश्नुते॥ ॥५८॥ इति वेदविदां वादः श्रूयते तत्र तत्र ह। कर्म यत्क्रियते प्रोक्तं परोक्षं न प्रकाशते॥५९॥ ॥श्रीनारद उवाच॥ ॥येनैवारभते कर्म तेनैवामुत्र तत्पुमान्। भुङ्क्ते ह्यव्यवधानेन लिङ्गेन मनसा स्वयम्॥६०॥

लिङ्गदेहेन

कर्मजोत्कृष्टदेहविच्छेदं विना १ लिङ्गा नाशा

फलभोक्तृदेह कर्मकर्तृदेहा कर्मि २

इति॥ एतच्चाकर्तृ कर्मजोत्कृष्टदेहाद्देहान्तरेण कृतनाशाकृताभ्यागमप्रसंगाच्चासंगतमिति भावः॥ संशयान्तरमाह॥ प्रोक्तं वेदोक्तं। कर्म क्रियते जनैः। तच्च चिरं तरं तत्क्षण एव परोक्षं अदृश्यं सन्न प्रकाशते। अतः कर्मलोन्नष्टत्वात् भोगो विरुद्ध इति भावः॥५९॥ प्रथमस्योत्तरं। येनैवेति॥ अव्यवधानेन कर्मजोत्कृष्टदेहविच्छेदं विना स्थूलदेहनाशेऽपि मनःप्रधानस्य लिङ्गदेहस्यानाशान्नोक्तदोषप्रसंग इत्यर्थः॥६०॥ ॥ ॥

लिङ्गशरीरस्यानाशा

॥येन देहेन कर्माणि करोति तं विहाय विहितं मुत्रान्येन देहेन फलं भुनक्तीति यावत्कृतनाशाकृताभ्यागमप्रसंगदूषणं दोषेत्यर्थः १

कृतकर्मकर्तावर लोके फलं भुनक्ति १

कर्मकरणकाले एव

जीवानां २ कर्मोपदेष्ट्र आचार्यो २

कर्मोपदेश कोपाध्याय

प्राचीनवर्हिः

आत्मतत्वं ४

गृह्याने सय दश्नुते इ २

श्री·तु·च·

८६

लिंगदेहेन न तु स्थूलदेह विशिष्टस्य

॥ननु कर्मफलं तेन लिंगेन विषयसंबंधोऽनुमीयते किं चैतन्नेत्याह। सत्यपीति॥६॥

॥तथा च परलोके दानादिकर्म स्थूलदेहविशिष्टस्यात्मनो वा कर्मफलं स्यादिति प्रश्नः३

पुरुषः२ जीवस्य — दशागात्रादि२ — प्राग्देहसदृशेन — स्वप्ने१

॥लिंगदेहविशिष्टस्यात्मनोऽनुभूतं तेन सुखदुःखं तेन स्पृश्यते॥शयानमिमं प्राग्देहं संसृष्टं जीवंतमुत्सृज्य तदभिमानं त्यक्त्वात्मानमात्मनि मनसि संस्काररूपेण लीनं तं कर्म यथानुभूतं तादृशेन शयानदेहसदृशेन कर्मोपस्थापितेन देहेनोपभुंक्ते न वा पश्वादिदेहेन तथा लोकांतरे पातीति भावः॥६॥ननु सवस्तुनाम लिंगविशिष्टस्यानेन दृष्टांतेन नोऽनुभूतं कर्म तत्तु दानप्रतिग्रहादि स्थूलदेहविशिष्टस्यैव दृश्यते। तत्राह। ममैते पुत्रादयः अहमेवैषां पालक इति ब्रुवन् मनसा यद्देहं गृहीयात् तत्ते देहात् प्रारब्धं सद्भिः कर्म पुमान् गृहीयात् येन कर्मणैव महंकारं गृहीतेन पुनर्भवो भवति। अन्यथा जन्मानुपपत्तेः। अतो मनसि मंतुर्मनो विशिष्टस्यैव कर्तृत्वात् अभिमानविषयस्य तु देहस्य पुत्रादिदेहवत् द्वारमात्रत्वमिति भावः॥६२॥ यदुक्तं कर्मफलेन दृष्टत्वान्नामुत्र भोग इति तत्राह। यथेति॥ उभये ज्ञानकर्मरूपैरिंद्रियाणां मीहितैः कदाचित् मनसि जातैस्तदभिप्रेतं तदनुमीयते। सत्यपि सर्वेंद्रियविषयसंबंधे युगपज्ज्ञानानुपपत्तेः॥ तदुक्तं पक्षपादेन॥ युगपज्ज्ञानानुपपत्तिर्मनसो लिंगमिति॥ एवं चैतन्नैतिकर्मणोऽपि पूर्वदेहजं कर्मफलं दृश्यते॥ तासामपि युगपदनुपपत्तेः॥६३॥ इतोऽपि कर्मफलं दृश्यते इत्याह। ना

पूर्वदेहजकर्मफलैव चैतन्नैमबात्। चैतन्नैर्ना१

कर्मस्वीकारे ४

लिंगविशिष्टस्य आत्मनः ... ॥यथेति॥५॥ अनुपदर्शनमात्रकार१

देहं१ — कुत्रचित्२

॥शयानमिममुत्सृज्य श्वसंतं पुरुषो यथा॥ कर्मात्मन्याहितं भुंक्ते तादृशेनेतरेण वा॥६१॥ ममेति मनसा यद्यद्देसावहमिति ब्रुवन्॥ गृहीयात्तत्पुमान्राद्धं कर्म येन पुनर्भवः॥६२॥ यथानुमीयते चित्तमुभयैरिंद्रियेहितैः॥ एवं प्राग्देहजं कर्म लक्ष्यते चित्तवृत्तिभिः॥६३॥ नानुभूतं क्व चानेन देहेनादृष्टमश्रुतं। कदाचिदुपलभ्येत यद्रूपं यादृगात्मनि॥६४॥ तेनास्य तादृशं राजंल्लिंगिनो देहसंभवम्॥ श्रद्धत्स्वाननुभूतोऽर्थो न मनः स्प्रष्टुमर्हति॥६५॥

स्वप्ने — मनसि१ — ॥उभये ज्ञानकर्मरूपैरिंद्रियाणामीहितैः२ — कर्म१ — हेतुना अस्य जीवस्य

वर्तमानेन२

॥कर्मफलेव मनोवृत्तेः कर्मसिद्ध्यतीति भावः२ — अननुभूतं। — पूर्वदेहज — कर्म१

नुभूतमिति। द्वाभ्याम्। अनेन वर्तमानदेहेन॥ क्वचकुत्रचिदपि॥ यन्नानुभूतं अनुपभुक्तं अदृष्टं वा अश्रुतं च यद्रूपं यदात्मकं। यादृक् यत्प्रकारं च तत्कदाचित्स्वप्नमनोरथादिषु आत्मनि मनस्युपलभ्येत॥६४॥ तेन हेतुना अस्य लिंगिनो वासनात्मस्य जीवस्य तादृशं तद्देहत्वाद्युक्तं पूर्वदेहसंभवं श्रद्धत्स्व निश्चयेन मन्यस्व। न ह्यननुभूतोऽर्थो मनः स्प्रष्टुं मनसि स्फुरितुमर्हतीति॥६५॥ ॥ ॥

कर्म१

८६

॥अतः कर्मसिद्धं फलदानपर्यंतं नेकर्मनाशः॥१॥

देवता।

॥ यदा तदैव ना ज्ञेन स्माविततः विचारितः सन् जगवान् जीवमनुगृह्णाति करोति तदा सजीवो लोके वेदे च परिनिष्ठितां बुद्धिं त्यजति अथो कर्मसु अहंत्वज्ञा पर मेश्वरमेव जजति ब्रवीति जावः ॥ ३॥

ये हि कर्मासक्ता ते एवं मंत्रादिरूपं भजंतो ब्रह्मादयो पि परमेश्वरं न विदुस्ते हि २

ईश्वरः ३

॥ वेदतात्पर्यगोचर तात्मतत्त्वे १

॥ कुत इत्यत आह । शब्दब्रह्मणि वेदे उरुर्विस्तारो यस्य । अर्थतो पि पार शून्ये तस्मिन् वर्तमाना मंत्राणां लिंगैर्वज्रहस्तत्वादि गुणयुक्त विविधदेवता निधानसामर्थ्यैः परिच्छिन्नमेवं मंत्रादिरूपं तत्तत्कर्मांगत्वेन भजंतः परमेश्वरं न विदुः ॥ ४५ ॥ तर्हि त्वं कोनाम कर्मत्यागं करिष्यति त्वा परमेश्वरमेव भजेदित्यत आह । यदा यमनुगृह्णातीति । अनुग्रहे हेतुः आत्मनि ना वितः सन् इति तदा लोके लोकव्यवहारे च वेदे च कर्ममार्गे परिनिष्ठितां मतिं त्यजति ॥ ४६ ॥ अर्थकाशिषु परमार्थत्वेन प्रकाशमानेषु पुरुषार्थ बुद्धिं मा कृथाः । श्रोत्रस्पर्शिषु श्रवणमात्ररोचनाय केवलं श्रोत्रप्रियेषु न स्पृष्टं वस्तु येः ॥ ४७ ॥ ननु वेदेन स्वर्गादि साधनत्वेनोक्तानि कर्माणीति वेदवादिनो वदंति कथमस्पृष्टवस्तुत्वमिति उच्यते तत्राह येधूम्रधियो मलिनबुद्धयः सकर्मकं कर्मपरं वेदमाहुः तेतद्विदः अवेदज्ञाः यतः ते स्वस्वरूपभूतं लोकमात्मतत्त्वं वेदतात्पर्यगोचरं न विदुः यत्र देवो स्ति ॥ ४८ ॥ त्वं तु महामूर्ख इत्याह ॥ आस्तीर्येति ॥ बृहद्वधात् बहुपशुवधात् मानी महाप्रवीण इति

कर्मपरत्वात् २

कर्मलिंगकत्वात् २

नजानंतीत्यर्थः १

दृष्टितः १ त्यजति १

॥ शब्दब्रह्मणि दुष्पारे चरंत उरुविस्तरे ॥ मंत्रलिंगैर्व्यवच्छिन्नं भजंतो न विदुः परं ॥ ४५ ॥ यदा यस्यानुगृह्णाति भगवानात्मभावितः ॥ स जहाति मतिं लोके वेदे च परिनिष्ठितां ॥ ४६ ॥ तस्मात्कर्मसु बर्हिष्मन्नज्ञानादर्थकाशिषु ॥ मार्थदृष्टिं कृथाः श्रोत्रस्पर्शिष्वस्पृष्टवस्तुषु ॥ ४७ ॥ स्वं लोकं न विदुस्ते वै यत्र देवो जनार्दनः ॥ आहुर्धूम्रधियो वेदं सकर्मकमतद्विदः ॥ ४८ ॥ आस्तीर्य दर्भैः प्रागग्रैः कार्त्स्न्येन क्षितिमंडलं ॥ स्तब्धो बृहद्वधान्मानी कर्म नावैषि यत्परं ॥ ४९ ॥ तत्कर्म हरितोषं यत्सा विद्या तन्मतिर्यया ॥ हरिर्देहभृतामात्मा स्वयं प्रकृतिरीश्वरः ॥ ५० ॥ तत्पादमूलं शरणं यतः क्षेमो नृणामिह ॥ ५१ ॥

नृ १ आपकः ईश्वरे १

अहंकारी १ सत्त्वार

विषयार दर्शयर

त्वमिमानी । अतः स्तब्धो ऽविनीतः सन् कर्म नावैषि । परं विद्यास्वरूपं तच्च न वेत्सि ॥ नारदः स्वयं क्रियायोपदेशं निरूपयति ॥ हरितोषयतीति हरितोषं यत् तदेव कर्म ॥ यया तस्मिन् हरौ मतिर्भवति सैव विद्या महाफलत्वात् ॥ ४९ ॥ कुत इत्यपेक्षायां हरेः परमफलत्वं त्राह ॥ आत्मा ॥ हरिर्देहभृतामात्मा ईश्वरश्चात एव हेतुः स्वयं स्वातंत्र्येण प्रकृतिः कारणं अतस्तस्य तत्पादमूलमेव शरणं आश्रयः ॥ यतः यस्मिन् ॥ ५० ॥ ५१ ॥ ॥ ॥

विरक्तः २

॥ न च तत्र जनैर्भयमनेन इवद्धः स्वं न यं वेत्यात्मा इति वेद स इति ॥ यो वेद स एव विद्वान् । स गुरुर्हरिरेव हरिश्च ॥ ५२ ॥ उक्तमुपसंहरति । एवं मव
तः प्रश्नः संछिन्नः पुरिहतः ॥ तदेवमात्मनो बंधमोक्षप्रकारैकं यास्पेण कथितेऽपि नातिनिर्विण्णचित्तं पुरागमनं प्रतीक्षमाणं संतं तूष्णीमेवम
ता नयप्रकंपितसकलगात्रं रुदन्तं निर्वासयितुं हरिणरूपकमाह । अत्रेति ॥ वदतो मे वचः शृणु ॥ ५३ ॥ क्षुद्रमल्पं चरतीति तथा तं अलिकं सुमन
सां पुष्पाणां शरणे आश्रये वाटिकायां मिथित्वा मिथः परस्परं स्त्रिया सह मिलित्वा तत्रैव रक्तं आसक्तं षडंघ्रयो भ्रमरास्तेषां गणस्तेषां सामसु गीतेषु लुब्धौ कर्णौ
यस्य तं ॥ परेषामसून्प्राणैः तृप्यंतीत्यसुतृपः ताः वृकाः अविगणय्य अगणयित्वा लुब्धकस्य व्याधस्य बाणेन भिन्नं मृगं मार्गय अन्वेषय ॥ श्लोकं प्रसु
तयोजयन्व्याचष्टे । सुमनाः सहस्त्रीणां शरणे आश्रमे पुष्पमधुगंधवत् क्षुद्रतमं काम्यकर्मविपाकजं कामसुखलवं जैव्हौपस्थ्यादि विचिन्वंतं मिथुनीभूय तत
दभिनिवेशितमनसं षडंघ्रिगणसामगीतवदतिमनोहरवनितादिजनालापेष्वतितरामतिलोभितकर्णमग्रे वृकवत् पूर्वदातमन आयुर्हरतोऽहोरात्रान्
तानकालविशेषाननविगणय्य गृहे पुष्पवाटिकायां विहरंतं पृष्ठतो अंतकोऽलक्षितस्ततः शरेण यः पराविध्यति तमिमं आत्मानं मृगं राजन्नन्विच्छ

प्रियतमात्मा १ जानाति १ स्तं॰ २ अ २

॥ स वै प्रियतम आत्मा यतो न भयमण्वपि ॥ इति वेद स वै विद्वान्यो विद्वान्स गुरुर्हरिः ॥ ५२ ॥ प्रश्न एवं हि संछिन्नो भवतः पुरुषर्षभ ॥ अत्र मे गद
तो गुह्यं निशामय प्रकृतिश्रितम् ॥ ५३ ॥ क्षुद्रं चरं सुमनसां शरणे मिथित्वा रक्तं षडंघ्रिगणसामसु लुब्धकर्णम् ॥ अग्रे वृकानसुतृपोऽविगणय्य यांतं पृष्ठे
मृगं मृगय लुब्धकबाणभिन्नम् ॥ ५४ ॥ सुमनः समधर्माणां स्त्रीणां शरण आश्रमे ॥ पुष्पमधुगंधवत् क्षुद्रतमं काम्यकर्मविपाकजम् ॥ ५५ ॥ कामसुखलवं जैह्व्यौ
पस्थ्यादि विचिन्वितम् ॥ सुमनोभिः सधर्मिणां द्वि॰ १

इदं १ सहेति शेषः २ ता १

दयं प्रसुमहसीति ॥ सुमनोभिः समानो धर्मः परिणामविरसत्वं यासां स्त्रीणां मिथित्वा तत्स्पर्शव्याख्या मिथुनीभूय स्त्रीभिः सहेति शेषः । रक्तमित्यस्य व्याख्या अभिनि
वेशितमनसमिति । अग्रे इत्यस्य वृकानित्यस्य व्याख्या आयुर्हरतीति ॥ यांतमित्यस्य व्याख्या विहरंतमिति । अतः तल्लिकायां गृहे न शरेण पराविध्यति इत्यादेव ताडयति ॥ ५४

यमः १

स्तं॰ ४
सुमनोभिः ६
अतिभावेन त्रि यः १
प्रश्नान्त तावु हं तेन तामिति ।
क्षुद्रं चरः ३
अचुक्ता
अपत्यस्याली पा न र
विदितं द्वि॰ १
जीक पार्श्वं तं ने द्गम ॥ धृ ॥

दुःखस्य २

॥ तेषु दैववशेन सुखदुःखे प्राप्नोतीति तत्र दृष्टांतमाह। चाण्डालम्॥ कुशपरीतो व्याघ्रः सारमेयः श्वा। दंडं दंडेन ताडनम्॥ ३॥ कामभ्रातृशारायोऽयस्य॥ ३१॥ ननु तर्हि सुखस्य मंजनवाद् दुःखस्य च प्रतीकारसंभवान्नैकांततो हेयत्वं। तत्राह। दुःखेष्विति॥ दुःखस्य प्रतीकारस्तावन्नास्ति। स्याच्चेत्तत्स्य प्रतिक्रिया तथापि त्रिविधेषु दुःखेषु मध्ये एकतरेणापि दुःखेनाव्यवच्छेदो वियोगो नास्ति प्रतिक्रियाणामपि दुःखरूपत्वात्। इति सदृष्टांतमाह। यथाहीति॥ ३३॥ दुःखस्य मूलं कर्म। तेनेति वर्णं निवर्तते तानि तु कर्माणि प्रतिक्रियादिकर्मणि नैव निवर्तंते इत्याह। नैकांततः अत्यंतं सवासनं केवलं ज्ञानरहितं अविषयोपसृतं प्राप्तं। अतो विशेषोऽन्ने निवर्तनं निवर्तते

॥ सवासनं ज्ञानरहितं प्रतिक्रियारूपं कर्म दुःखमूलकर्मकं कर्म एवं नोपायः न निवर्तकमित्यर्थः॥ ३॥ ॥

देवतेर्षु दुःखं

लभते। देवं वियोगः उत्तममध्यमो सनो कर्तायोग ते॥ ४॥

॥ कुशपरीतो यथादीनः सारमेयो गृहं गृहम्॥ चरन्नर्वं पतियोऽर्दंडं दंडमोदनमेवंवा॥ ३॥ तथा कामाशयो जीव उच्चावचपथात्क्रमन्॥ उपर्यधो वा मध्ये वा याति दिष्टं प्रियाप्रियम्॥ ३१॥ दुःखेष्वेकतरेणापि देवभूतात्महेतुषु॥ जीवस्य न व्यवच्छेदः स्याच्चेत्तत्प्रतिक्रिया॥ ३२॥ यथाहि पुरुषो भारं शिरसा गुरुमुद्वहन्। तं स्कंधेन स आधत्ते तथा सर्वाः प्रतिक्रियाः॥ ३३॥ नैकांततः प्रतीकारः कर्मणां कर्म केवलम्॥ द्वयं ह्यविद्योपसृतं स्वप्ने स्वप्न इवानघ॥ ३४॥ अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते॥ मनसा लिंगरूपेण स्वप्ने विचरतो यथा॥ ३५॥ अथात्मनोऽर्थभूतस्य यतोऽनर्थपरंपरा॥ संसृतिस्तद्व्यवच्छेदो भक्त्या परमया गुरौ॥ ३६॥ ॥ ॥

॥ स्वप्ने स्वाप्नदेहमत्वेनैतद्देहत्माभावा विचरतो जीवस्य संसृतिर्यथा सीततदतर

अज्ञानात्। ॥ देहे न ष्टेऽपि उपाधिभूतस्य मनसः विद्यमानत्वात्संसृतिर्न्निवर्तत इत्यर्थः॥ २॥

यथा संसृतिर देहादेः।

कर्तव्यमिति भावः॥ अत्र दृष्टांतः। स्वप्ने दुःखप्रबोधं विनो तं स्वप्नं स्वप्नांतरेण न प्रतिकरोतीत्यर्थः॥ ३४॥ ननु तर्हि अज्ञानविलसितत्वेन संसृतिहेतोर्देहादेरभ्यसत्वात्किं तन्निवर्तनप्रयासेन तत्राह। अर्थेहीति॥ लिंगरूपेण उपाधिभूतेन॥ ३५॥ तदेवं संसृतिप्रकारमुक्त्वा तन्निवृत्तिप्रकारमाह। अथ तस्मात् पुरुषार्थभूतस्य वा त्मनः यतो ज्ञानात्मनसो वा अनर्थपरंपरा रूपा संसृतिर्भवति। तस्य व्यवच्छेदो गुरुरूपे वासुदेवे भक्त्यैव॥ ३६॥ ॥ ॥

देव २

धीः ४

दुःखहेतुकर्मणः २

दुःखहेतु कर्मलेन निवर्तते। प्रतिक्रियारूपकर्मलेन निवर्तते। कर्मलो द्वयोः कर्मत्वाविशेषेपेऽक रूप तयैकरूपयो रथैव प्रतिनाविरूद्धयोर्निवर्तन स्याच्चेत्त प्रतिक्रिया। द्विः २

॥ दुःखहेतुकर्मा प्रतिक्रियारूपकर्म चेतिकर्म द्वयं

भक्तियोगः२

॥ननु संसृतिनिवृत्तिर्वैराग्यपूर्वकाद्ज्ञानादेव। न तु भक्त्या। तरति शोकमात्मविदित्यादिश्रुतेः। तत्राह। वासुदेव इति॥ सध्रीचीनेन समीचीनेन प्रकारेण॥३७॥ नन्वसौ महाफलो भक्तियोगः कथं स्यादत आह॥ स त्वच्युतस्य कथामाश्रित्य वर्तमानो ऽचिरात्स्यात्। कथं स्यात्तदाह। श्रृण्वतः श्रद्धधानस्य च॥३८॥ कुत्र स्यात्तदाह। यत्रेति॥ भगवतो गुणानुकथनश्रवणे च व्यग्रं सक्तं चेतो येषां ते॥३९॥ ननु साधुसंगं विना स्वयमेव हरिकथाचिंतनादिना भक्तिर्भवेदेवेत्याशंक्याह। द्वाभ्यां। तस्मिन्स्थाने महद्भिर्मुखरिताः कीर्तिता मधुभिदश्चरित्रमेव पीयूषं तदेव शेषो ध्यत इति शेषो यासु। असारांश रहितं शुद्धमसृतवान्तम्य इत्यर्थः॥ अवितृषः अलंबुद्धिशून्याः संतः गाढैः सावधानैः कर्णैः पिबंतः सरितः पिबंति सेवंते॥ अशनमशनेन क्षुत्तृट्पते। अशनादयस्तान्न स्पृशंति। भक्तिरसकात्तन बाधंत इत्यर्थः॥४०॥ सत्संगमंतरेण स्वयमेव कथाचिंतनादावालस्यादिना रसावेशाभावाच्च दुस्तिपासाधुसंगमि

भक्तियोगः१ परितः२
निर्मलचेताः२ प्रख्यातः३

॥वासुदेवे भगवति भक्तियोगः समाहितः॥ सध्रीचीनेन वैराग्यं ज्ञानं च जनयिष्यति॥३७॥ सो ऽचिरादेव राजर्षे स्यादच्युतकथाश्रयः॥ श्रृण्वतः श्रद्दधानस्य नित्यदा स्याददधीयतः॥३८॥ यत्र भागवता राजन्साधवो विशदाशयाः॥ भगवद्गुणानुकथनश्रवणव्यग्रचेतसः॥३९॥ तस्मिन्महन्मुखरिता मधुभिच्चरित्रपीयूषशेषसरितः परितः स्रवंति॥ ता ये पिबंत्यवितृषो नृप गाढकर्णैस्तान्न स्पृशंत्यशनतृड्भयशोकमोहाः॥४०॥ एतैरुपद्रुतो नित्यं जीवलोकः स्वभावजैः॥ न करोति हरेर्नूनं कथामृतनिधौ रतिम्॥४१॥ प्रजापतिपतिः साक्षाद्भगवान्गिरिशो मनुः॥ दक्षादयः प्रजाध्यक्षा नैष्ठिकाः सनकादयः॥४२॥ मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुः॥ भृगुर्वसिष्ठ इत्येते मदंता ब्रह्मवादिनः॥४३॥ अद्यापि वाचस्पतयस्तपोविद्यासमाधिभिः॥ पश्यंतो ऽपि न पश्यंति पश्यंतं परमेश्वरम्॥४४॥ ॥

महन्मुखरिताः कीर्तिताः

शिवः२

क्षुधा

४१

तस्य भक्तिर्न संभवतीत्याह। एतैरिति॥ भगवदनुग्रहमंतरेण तु न कस्यापि ज्ञानं संभवतीति स्वस्य न्यायेनाह। चतुर्भिः। प्रजापतिपतिर्ब्रह्मा॥४२॥ मदंता अहं नारदो ऽन्ते येषां ते॥४३॥ वाचोपतयो ऽपि तपोविद्यासमाधिरूपाभिः पश्यंतो विविच्चन्तो ऽपि पश्यंतं सर्वसाक्षिणं न पश्यंति॥४४॥ ॥ ॥ ॥

विवं१

॥पंचविंशाध्यायस्य पद्श्लोके २

विषूचीनं सर्वतोमुखं मनः १

॥ग्राम्यकर्मेत्यस्यानुवादः॥ ग्राम्यमेणं रतिरिति। तस्याख्या व्याख्या ख्यवायइति॥१४॥ विषूचीनं पदार्थानुवादः विषूचिरिति॥ तद्गुणैर्मनोगुणैः सत्वरजोभिः॥१६॥ मह्यिबीयद्यदीतितेत्यादेरर्थसंग्रह्यात्॥ यथायथा बुद्धिः स्वप्ने विक्रियते जाग्रति विकरोति च इंद्रियाणि परिणमयति तस्यां गुणैः र्क्तोलिष्ट्रश्रात्मा तथातथा तस्यावृत्ती दर्शनस्पर्शनाद्याः केवलमुपद्रष्टैव सन् बलादनुकार्यते॥१७॥ आशुगमित्येतद्व्याचष्टे॥ संवत्सरस्येवाप्रतिहतोरयोवेगः प्रतीतोयस्य स संवत्सररथः॥ वस्तुरस्तु अगतिः स्वप्न शारीरादेर्बुद्धावेवविष्टत्वेन देशांतरगत्यभावात्॥ पाठांतरे संवत्सरश्चतत्र

नराणंकंमुखं २ ॥मुख्यादीन्द्रियाराणामासेव्यमपमासु
सी विप्रश्नाखा १

मत्सुदारत्वात् २ मलक्षितंगं २ जीवः १ पक्षिमः १

॥प्रष्ठं तं च निष्ठं तं च शास्त्रं पंचालसंज्ञितम्॥ पितृयानं देवयानं श्रोत्रात् श्रुतधरादृब्रुतेत्॥१३॥ आसुरीमे द्रुमर्वाग् द्वे व्यवायो ग्राम्यमेणं रतिः॥ उपस्थो दुर्मदः प्रोक्तो निर्ऋतिर्गुद उच्यते॥१४॥ वैशसं नरकं पायुर्लुब्धकोंधौ तु मे शृणु॥ हस्तपादौ पुमांस्ताभ्यां युक्तो याति करोति च॥१५॥ अंतःपुरं च हृदयं विषूचिर्मन उच्यते॥ तत्र मोहं प्रसादं च हर्षं प्राप्नोति तद्गुणैः॥१६॥ यथायथा विक्रियते गुणाक्तो विकरोति च॥ तथा तथोपद्रष्टात्मा तद्वृत्तीरनुकार्यते॥१७॥ देहो रथस्त्विंद्रियाश्वः संवत्सररयो गतिः॥ द्विकर्मचक्रस्त्रिगुणध्वजः पंचासुबंधुरः॥१८॥ मनोरश्मिर्बुद्धिसूतो हृन्नीडो द्वंद्वकूबरः॥ पंचेंद्रियार्थप्रक्षेपः सप्तधातुवरूथकः॥ आकूतिर्विक्रमो बाह्यो मृगतृष्णां प्रधावति॥१९॥ एकादशेंद्रियचमूः पंचसूनाविनोदकृत्॥ संवत्सरश्चंडवेगः कालो येनोपलक्षितः॥२०॥ ॥ ॥ ॥

देहस्त्पोरथः १

रश्मिनउपवेशस्थाने २ पंचराकाद्दोविषयाः प्रक्षिप. तेयस्मिन् २ पंचकर्मेंद्रियाणि विक्रमागरे
॥दाशोकामो सौणीता धो वा कूवरो युगवंधनस्थाने वस्युरे
सत्वादिरक्षार्थं वेरणानियस्य २ प्रकारायस्य

तं वयश्रुतान्ंगतिर्यस्येति दीर्घमित्यस्य व्याख्या नारदेन न कृता। द्विचक्रमित्यस्य व्याख्या द्विकर्मचक्र इति॥ त्रिगुणध्वज इति त्रिवेणु पद व्याख्या॥१८॥ पंचसूत्रण मित्येतद्व्याचष्टे। पंचेंद्रियार्थप्रक्षेप इति॥१९॥ पंचें[illegible] विनोदकृत्। अनेन चराचरम् गयांतवेत्यादिव्याख्यातरः

डश्रेः ३

स्त्रीसंगः २
ग्राम्यस्य जनानां २

लिङ्गः ४
पंचप्राणबंधना नियस्य प

देहश्वंतामम तेइंद्रियदंडके वस्य १

इदे: २
॥षड्विंशाध्यायश्लोक ३

॥पायुना उक्तौ तस्य दुःसमा दे दुष्यकता मरव्रिता वीप्रकृता पादर्धा २
पुराणपाप

कालस्य।

॥ परिस्पन्द परिज्ञेन मलिनेन ॥ २१ ॥ जगीनीत्वेन जगद्धे लोकानां क्षयाय ॥ २२ ॥ चराः संसारिणः । भूतानामुपसर्गे पीडायां । आशुशीघ्रो मृत्युहे तुः रयो वेगो यस्य । प्रज्वरस्येति प्रशाकं व्याख्या ॥ पाठांतरे भूतकृतामरयः । अनेन चाधिभौतिक रूपरुद्रस्य पदं व्याख्यातम् । द्विविधः शीतोष्ण भेदेन प्रवेशनेदात् ॥ २३ ॥ एवं परो ज्वरत्वेनोक्तमर्थं व्याख्याय मनविकथातात्पर्यमाह । एवमित्यादि विरमकमेण त्वं तेनाध्याधिदैविकादि त्रिदुःखैर्क्लि श्यमानो ममाहमित्ति देहे शतं वर्षाणि येतेवर्ततेइति द्वयोरन्वयः ॥ २४ ॥ अशनादिकामादीन्प्राणधर्मान्बंधत्वादीनेंद्रियधर्मान्कामादीन् मनोधर्मान्निर्गुणे प्यात्मन्यध्यस्य कामलवान्विषय सुखलेशान्ध्यायन्कर्मकृत् ॥ २५ ॥ ततः किमतआह । यदेति द्वाभ्यां स्वद

संवत्सरस्य।
कालस्य।
आधि व्याधिक्लेशादिर
क्रीं।
शैत्यं वैषम्यं च

॥ तस्याः कालनीते गंधर्वीगंधर्व्योराक्षयः स्मृताः ॥ हरंत्यायुः परिस्पन्द त्वपव्युतरशतत्रयम् ॥ २१ ॥ कालकन्या जरा साक्षाल्लोकस्तां नाभिनंदति ॥ स्वसा रं जगृहे मृत्युः क्षयाय यवनेश्वरः ॥ २२ ॥ आधयो व्याधयस्तस्य सैनिका यवनाश्वराः ॥ भूतोपसर्गाशुरयः प्रज्वरो द्विविधो ज्वरः ॥ २३ ॥ एवं बहु विधैर्दुःखैर्दैवभूतात्मसंभवैः ॥ क्लिश्यमानः शतं वर्षं देहे देही तमोवृतः ॥ २४ ॥ प्राणेंद्रियमनोधर्मानात्मन्यध्यस्य निर्गुणः ॥ शेते कामलवान् ध्यायन् ममाहमिति कर्मकृत् ॥ २५ ॥ यदात्मानमविज्ञाय भगवंतं परं गुरुम् ॥ पुरुषस्तु विषज्जेत गुणेषु प्रकृतेः स्वदृक् ॥ २६ ॥ गुण भिमानी स तदा कर्माणि कुरुते वशः ॥ शुक्लं कृष्णं लोहितं वा यथाकर्माभिजायते ॥ २७ ॥ शुक्लात्प्रकाशभूयिष्ठांल्लोकानाप्नोति कर्हिचित् ॥ दुःखोदर्कान्क्रियायासांस्तमः शोकोत्कटान्क्वचित् ॥ २८ ॥ क्वचित्पुमान्क्वचिच्च स्त्री क्वचिन्नोभयमंधधीः ॥ देवो मनुष्यस्तिर्यग्वा यथाकर्मगुणं भवः ॥ २९ ॥

नपुंसकं।

कृस्वप्रकाशस्वज्ञानो पि ॥ २६ ॥ शुक्लं सात्विकं । कृष्णं तामसं । लोहितं राजसं यथा कर्म तथा जायते ॥ २७ ॥ तदेवाह । शुक्लादिति द्वाभ्यां । प्रकाशो भूयिष्ठो येषु । दुःखमुदर्कमुत्तरं फलं येषु । क्रियया आयासो येषु तान् लोहितात् ॥ तमः शोकाबुत्कटौ येषु तान् कृष्णादिति ज्ञेयम् ॥ २८ ॥ नोभयं नपुंसकम् ॥ यथाकर्मगुणं कर्मगुणानतिक्रम्य ॥ २९ ॥

सत्त्वादि।

आधिदैविका दिभिर्दुःखैः ३

भौतिकीजरं

संस्थापय ३
विषयसुखलेशान् २
स्वर्गलोकान् २